(महाविषविशिष्टे, त्रि । यथा, सुश्रुते कल्पस्थाने ८ अध्याये ।
"त्रिविधा वृश्चिकाः मन्दमध्यमहाविषाः ।"
(महद् विषम् । महाविषे, क्ली । यथा, सुश्रुते कल्पस्थाने २ अध्याये ।
"महाविषेण हृदये ग्रन्थिशूलोद्गमौ भृशम् ॥")

महाविषुवं, क्ली, (विषु साम्यमस्त्यत्रेति । विषु + "वप्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम् ।" ५ । २ । १०६ । इत्यस्य वार्त्तिकात् वप्रत्ययः । महच्च तत् विषुवञ्चेति । अस्मिन् समये दिवारात्र्योः समत्वात्तथात्वम् ।) मेषसंक्रान्तिः । यथा,—
"महाविषुवमाख्यातं क्षतिभिश्चैत्रचिह्नितम् ॥"
इति शब्दरत्नावली ॥
तस्मिन् मक्करनिम्बपत्रद्वयभक्षणम् । यथा, कृत्यचिन्तामणौ ।
"मक्करं निम्बपत्राभ्यां योऽत्ति मेषगते रवौ ।
अपि रोषान्वितस्तस्य तक्षकः किं करिष्यति ॥"
तत्र शक्तादिदानं यथा,—
"मेषादौ शक्तवो देया वारिपूर्णा च गर्गरी ॥"
वारिपूर्णघटदानमन्त्रादि यथा,—
"एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात् सफला मम सन्तु मनोरथाः ॥
वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने ।
ददाति सुरराजेन्द्र ! स याति परमां गतिम् ॥"
महार्णवे ।
"यो ददाति हि मेषादौ शक्तूनम्बुघटान्वितान् ।
पितॄनुद्दिश्य विप्रेभ्यः सर्व्वपापैः प्रमुच्यते ॥"
तत्र छत्रपादुकादानं यथा,
"विप्रेभ्यः पादुकाच्छत्रं पितृभ्यो विषुवे शुभम् ।"
पितृभ्यः पितॄनुद्दिश्येत्यर्थः । इति तिथ्यादितत्त्वम् ॥

महाविषुवचक्रं, क्ली, (महाविषुवस्य चक्रम् ।) नक्षत्रघटितनराकारचक्रम् । यथा,
"मूर्द्ध्नि सप्त मुखे त्रीणि हृदये पञ्च विन्यसेत् ।
चितयं हस्तपादेषु महाविषुवभक्रमात् ॥
मस्तके भूपतेः सौख्यं वदने पटुता स्वभे ।
हृदये च धनाध्यक्षोऽर्थप्राप्तिर्दक्षिणे करे ॥
वामे करे महद्दुःखं सुखं पादे च दक्षिणे ।
भ्रमणं वामपादे च कथितं विषुवत्फलम् ॥"
इति ज्योतिषतत्त्वम् ॥

महाविष्णुः, पुं, (महांश्चासौ विष्णुः सर्व्वव्यापकश्चेति ।) महाविराट् । यथा । 'यस्य जले कोटिकोटिब्रह्माण्डानि महाविष्णुरोमकूपगतानि तस्या विरजायाः परिखाभूतायाः उपरि महावैकुण्ठलोकः । तस्योर्द्ध्वभागे गोलोकः । तस्य नाथः कृष्णो देवलीलः स परिवारेण वर्त्तते । इति भागवतामृतकणिका । स च श्रीकृष्णस्य कलाविशेषः । यथा,—
"विष्णुर्महान् स इह यस्य कलाविशेषो
गोविन्दमादिपुरुषं तमहं भजामि ॥"
इति भागवतामृतपूर्व्वखण्डः ॥

महावीचिः, पुं, (न विद्यते वीचिः सुखं यत्र । महानवीचिरत्र ।) नरकविशेषः । यथा, मनुः ।
"नरकं कालसूत्रञ्च महानरकमेव च ।
सञ्जीवनं महावीचिं तपनं संप्रतापनम् ॥"
यातीति पूर्व्ववचनस्थमनुवर्त्तते ।
"महावीचिर्यत्र महाकल्लोलेन तु नीयते ॥"
इति प्रायश्चित्तविवेकः ॥

महावीर्य्यं, क्ली, (वीजाय साधु इति यत् । महत् वीर्य्यम् ।) विटपम् । तत्तु मुष्कवङ्क्षणयोरन्तरम् । इति हेमचन्द्रः ॥

महावीरः, पुं, (वीन् पक्षिणः ईरयतीति । ईर + कः । ततो महांश्चासौ वीरश्चेति ।) गरुड़ः । वीरयतीति । वीर + कः । महान् वीर इति कर्म्मधारयः । शूरः । सिंहः । यज्ञानलः । (स च मनुपुत्त्रविशेषः । यथा,श्रीभागवते । ५।१२५।
"अग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतो-घृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति ॥")
वज्रः । श्वेततुरङ्गः । सञ्चानपक्षी । इति मेदिनी । रे, २८६ ॥ अन्तिमजिनः । (अयमेव सिद्धार्थस्य त्रिशलागर्भजातः पुत्त्रः । तद्विवरणं यथा, अरिष्टनेमिपुराणान्तर्गतजैनहरिवंशे ।
"सर्व्वार्थश्रीमतीजन्मा तस्मिन् सर्व्वार्थदर्शनः ।
सिद्धार्थोऽभवदर्काभो भूपः सिद्धार्थपौरुषः ॥
यत्र याति धरित्रीयमभूदेकत्रदोषिणी ।
धर्म्मार्थिन्योऽपि यत्रात्तपरलोकभयाः प्रजाः ॥
कस्तस्य तान् गुणानुद्यान्नरस्तुलयितुं क्षमः ।
वर्द्धमानगुरुत्वं यैः प्रापितः स नराधिपः ॥
उच्चैः कुलाद्रिसम्भूता सहजस्नेहवाहिनी ।
महिषी श्रीसमुद्रस्य तस्यासीत् प्रियकारिणी ॥
चेतश्चेटकराजस्य यास्ताः सप्तशरीरिजाः ।
अतिस्नेहाकुलश्चक्रुस्तासाद्या प्रियकारिणी ॥
कस्तां योजयितुं शक्तस्त्रिशलां गुणवर्णनैः ।
या स्वपुण्यैर्महावीरप्रसवाय नियोजिता ॥
सर्व्वतोऽथ नमन्तीषु सर्व्वासु सुरकोटिषु ।
प्रभावान्निपतन्तीषु नभसो वसुवृष्टिषु ॥
वीरेऽवतरति त्रातुं धरित्रीमसुधारिणः ।
तीर्थनाथ्युतकल्पोच्चैः पुष्पोत्तरविमानतः ॥
सा तं षोड़शसुस्वप्नदर्शनोत्सवपूर्व्वकम् ।
दध्रे गर्भेश्वरं गर्भे श्रीवीरं प्रियकारिणी ॥
पञ्चसप्ततिवर्षाष्टमाससमासार्द्धशेषकः ।
चतुर्थस्तु तदा कालो दुःखमः सुखमोत्तरः ॥
आषाढ़शुक्लषष्ठ्यान्तु गर्भावतरणेऽर्हतः ।
उत्तराफाल्गुनीनीड़सड्डुराजद्विजश्रितः ॥
दिक्कुमारीकृताभिख्यां द्योतिर्मूर्त्तिर्घनस्तनीम् ।
प्रच्छन्नो भासयद्गर्भस्तां रविः प्रावृषं यथा ॥
नवमासेष्वतीतेषु स जिनोऽष्टदिनेषु च ।
उत्तराफाल्गुनीष्विन्दौ वर्त्तमानेऽजनि
प्रभुः ॥
ततोऽन्यजिनमाहात्म्यात्लुठत्पीठकिरीटकाः ।
प्रणेमुरवधिज्ञाततद्वृत्तान्ताः सुरेश्वराः ॥
शङ्खभेरीहरिध्वानघण्टानिर्घोषघोषणम् ।
समाकर्ण्य सुरास्तूर्णं घूर्णितार्णवराविणः ॥
सप्तानीकमहाभेदाः सस्त्रीकाः कृतभूषणाः ।
सेन्द्राश्चतुर्णिकायास्ते प्रापुः कुण्डपुरं पुरम् ॥
त्रिःपरीत्य पुरं देवाः पुरन्दरपुरःसराः ।
जिनमिन्दुमुखं देवं तद्गुरू च ववन्दिरे ॥
मातुः शिशुं विकृत्यान्यं सुप्तायाः सुरमायया ।
इन्द्राणी प्रणता नीत्वा जिनेन्द्रं हरये ददौ ॥
गृहीत्वा करयुग्माभ्यां तमभ्यर्च्य चिरं हरिः ।
चक्रे नेत्रसहस्रोरुपुण्डरीकवनार्च्चितम् ॥
ततश्चन्द्रावदाताङ्गमिन्द्रस्तुङ्गमतङ्गजम् ।
शृङ्गौघमिव हेमाद्रेर्मुक्ताधो मदनिर्झरम् ॥
गण्डस्थलमदामोदभ्रमद्भ्रमरमण्डलम् ।
तमिवाधित्यकावस्थतमालवनमण्डितम् ॥
कर्णान्तरततासक्तरक्तचामरसंहतिम् ।
तं यथाधित्यकाधीनरक्ताशोकमहावनम् ॥
सुवर्णरचया चार्व्वा परिवेष्टितविग्रहम् ।
तमेव च यथोपात्तकणत्कनकमेखलम् ॥
अनेकरदसंवृत्तनृत्यसङ्गीतयोषितम् ।
तमिवोत्तुङ्गशृङ्गाग्रनृत्यन्मायत्सुराङ्गनम् ॥
सुवृत्तदीर्घसञ्चारिकररुद्धदिगन्तरम् ।
तमिवात्यायतिस्थूलस्फुरद्भोगभुजङ्गमम् ॥
ऐशानधारितस्फीतधवलातपवारणम् ।
तमिवोर्द्धस्थिताभ्यर्णसम्पूर्णशशिमण्डलम् ॥
चामरेन्द्रभुजोत्क्षिप्तचलच्चामरहारिणम् ।
तं यथा चमरीक्षिप्तबालव्यजनवीजितम् ॥
ऐरावतं समारोप्य जिनेन्द्रं तस्य मण्डनम् ।
देवैः सह गतः प्राप मन्दरं स पुरन्दरः ॥
तं पाण्डुकवने रम्ये मन्दरस्य जिनं हरेः ।
पाण्डुकायां प्रसिद्धायां शिलायां सिंहविष्टरे ॥
संस्थाप्य विबुधानीतक्षीरसागरवारिभिः ।
शातकुम्भमयैः कुम्भैरभिषिच्य समं सुरैः ॥
वस्त्रालङ्कारमालाद्यैरलङ्कृत्य कृतस्तुतिः ।
आनीयमातुरुत्सङ्गे जिनं कृत्वा कृतोचितः ॥
सिद्धार्थप्रियकारिण्योः सममानन्ददायकम् ।
वर्द्धमानाख्यया स्तुत्वा स देवो वासवोऽगमत् ॥
मासान् पञ्चदशाजन्मद्युम्नधारा दिने दिने ।
याः पूर्व्वमापतंस्ताभिस्तर्पितोऽर्थी जनोऽखिलः ॥
वर्द्धमानः सुरैः सेव्यो ववृधे स यथा यथा ।
पितृबन्धुत्रिलोकानामनुरागस्तथा तथा ॥
सुरासुरनराधीशमौलिमालार्च्चितक्रमः ।
त्रिंशद्वर्षप्रमाणोऽभूद्वीरो भोगैः परिष्कृतः ॥
शुद्धवृत्तं न भोगेषु चित्तं तस्य चिरं स्थिरम् ।
कुटिलेषु यथा सिंहनखरन्ध्रेषु मौक्तिकम् ॥
शान्तचित्तं कदाचित्तं स्वयं बुद्धमबोधयत् ।
नत्वा सारस्वतादित्यमुख्यालौकान्तिकाः सुराः ॥
सौधर्म्माद्यैः सुरैरेत्य कृतोऽभिषवपूजनः ।
आरुह्य शिविकां दिव्यामुह्यमानां सुरेश्वरैः ॥
उत्तराफाल्गुनीष्वेव वर्त्तमाने निशाकरे ।
कृष्णस्य मार्गशीर्षस्य दशम्यामगमद्वनम् ॥
अपनीय तनोः सर्व्वं वस्त्रमाल्यादिभूषणम् ।
पञ्चमुष्टिभिरुद्धृत्य मूर्द्धजानभवन् मुनिः ॥
केशकुन्तलसङ्घातं जिनस्य भ्रमरासितम् ।